तद्देवानुप्रविष्टः स य इति निर्द्दिश्यते । स एकोऽसावयं पुरुषे यश्चासावादित्ये यः परमानन्दः श्रोत्रियप्रत्यक्षो निर्दिष्टो यस्यैकदेशं ब्रह्मादीनि भूतानि सुखार्हाण्युपजीवन्ति स यश्चासावादित्ये इति स एकः । तं मीमांसया च सिद्धमुपसंहृतं भिन्नप्रदेशस्थघटाकाशाकाशैकत्ववत् । नन्वानन्दस्य मीमांसा प्रकृता तस्या अपि फलमुपसंहर्त्तव्यम्, अभिन्नः स्वाभाविक आनन्दः परमात्मैव न विषयविषयिसम्बन्धजनित इति । ननु तदनुरूप एवायं निर्देशः स यश्चायं पुरुषे यश्चासावादित्ये स एक इति भिन्नाधिकरणस्थविशेषोपमर्दनेन । नन्वेवमप्यादित्यविशेषणग्रहणमनर्थकम् । नानर्थकम् । उत्कर्षापकर्षापोहार्थत्वात् । द्वैतस्य हि यो मूर्त्तामूर्त्तलक्षणस्योत्कर्षः सवित्रभ्यन्तरगतः स चेत् पुरुषगतविशेषोपमर्द्देन परमानन्दमपेक्ष्य समो भवति न कश्चिदुत्कर्षोऽपकर्षो वा तां गतिं गतस्येत्यभयं प्रतिष्ठां विन्दत इत्युपपन्नम्"। "स यः कश्चिदेवं यथोक्तं ब्रह्मोत्सृज्योत्कर्षापकर्षमद्वैतं सत्यं ज्ञानमनन्तमस्मीति । एवशब्दस्य प्रकृतपरामर्शार्थत्वात् । स किम् ? अस्माल्लोकात्प्रेत्य दृष्टादृष्टविषयसमुदायो ह्ययं लोकस्तस्मादस्माल्लोकात्प्रेत्य प्रत्याहृत्य निरपेक्षो भूत्वा एतं यथा व्याख्यातम् अन्नमयमात्मानमुपसङ्क्रामति विषयजातमन्नमयात् पिण्डात्मनो व्यतिरिक्तं न पश्यति सर्वं स्थूलभूतमन्नमयमात्मानं पश्यतीत्यर्थः । ततोऽभ्यन्तरमेतं प्राणमयं सर्व्वान्नमयात्मस्थमविभक्तम् । अथैतं मनोमयं विज्ञानमयमानन्दमयमात्मानमुपसंक्रामति । अथाऽदृश्येऽनात्म्येऽनिरुक्तेऽनिलयेऽभयं प्रतिष्ठां विन्दते तत्रैव नान्यत्र च" शाङ्करभाष्यम्

अत्र प्रसङ्गात् सुखदुःखादीनां स्वरूपकारणादिकं तावन्निरूप्यते प्रकृतेः सुखदुःखमोहात्मकसत्त्वरजस्तमोगुणरूपत्वात् सुखादीनां सत्त्वादिकार्य्यत्वम् । यथोक्तं सां०का० "प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः । अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः" अस्याः सां०कौ० व्याख्या ।

"प्रीतिः सुखं प्रीत्यात्मकः सत्वगुणः, अप्रीतिर्दुःखं अप्रीत्यात्मकोरजोगुणः, विषादो मोहः विषादात्मकस्तमोगुण इति । ये तु मन्यन्ते न प्रीति र्दुःखाभावादतिरिच्यते एवं दुःखमपि न प्रीत्यभावादन्यदिति तान् प्रत्यात्मग्रहणम् । नेतरेतराभावाः सुखादयः अपि तु भावाः आत्मशब्दस्य भाववचनत्वात् प्रीतिरात्मा भावो येषां ते प्रीत्यात्मानः । एवमन्यदपि व्याख्येयम् । भावरूपता चैषामनुभवसिद्धा परस्पराभावात्मकत्वे तु परस्पराश्रयापत्तेरेकस्याप्यसिद्धेरुभयासिद्धिरिति भावः । स्वरूपमेषामुक्त्वा प्रयोजनमाह प्रकाशप्रवृत्तिनियमार्थाः अत्रापि यथासंख्यमेव । रजः प्रवर्त्तकत्वात्सर्वत्र लघु सत्वं प्रवर्त्तयेत् यदि तमसा गुरुणा न नियम्येत । तमोनियतन्तु क्वचिदेव प्रवर्त्तयतीति भवति तमो नियमार्थम् । प्रयोजनमुक्त्वा क्रियामाह अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च वृत्तिः क्रिया सा च प्रत्येकमभिसम्बध्यते । अन्योन्याभिभववृत्तयः एषामन्यतमेनार्थवशादुद्भूतेनान्यदभिभूयते । तथा हि सत्त्वं रजस्तमसी अभिभूय शान्तामात्मनो वृत्तिं प्रतिलभते एवं रजः सत्त्वतमसी अभिभूय घोराम्, एवं तमः सत्त्वरजसी अभिभूय मूढामिति" ।

"प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योन्यं वैधर्म्म्यम्" सां० सू० । "गुणानां सत्त्वादिद्रव्यत्रयाणामन्योन्यं सुखदुःखविषादाद्यैर्वैधर्म्म्यम् कार्य्येषु तद्दर्शनादित्यर्थः सुखादिकं च घटादिविषयाणामपि रूपवदेव धर्मोऽन्तःकरणोपादानत्वात् सर्व्वकार्य्याणां, तत्तद्गुणत्वौचित्यात् एतच्चानुपदं निरूपयिष्यते । मनसः संकल्पात्मकतावत् सत्त्वादीनां सुखाद्यात्मकता धर्म्मधर्म्म्यभेदात्" सा०प्र०भा०।

"हेयं दुःखमनागतम्" इत्युपक्रम्य "द्रष्टृदृश्यसंयोगो हेयहेतुः" पात०सू० हेयस्य दुःखस्य कारणं द्रष्टृदृश्ययोः संयोगमुक्त्वा "प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्" पा०सूत्रे दृश्यपदार्थो निरूपितः । अयमर्थः प्रकाशशीलं सत्त्वं, क्रियाशीलं रजः, प्रकाशक्रिययोः प्रतिबन्धरूपस्थितिशीलं तमः । तत्र सत्त्वं मृदुत्वात् तप्यं, तापकं रजः रञ्जकत्वात् । एवं सत्त्वरजसोस्तप्यतापकभावे सति तमसा मोहः सम ताप इत्येवं रूपभ्रान्तिरूपोमोहः पुरुषस्य भवति । तदिदं गुणत्रयं स्वस्वकार्य्ये मिथः सहायमविवेकिभोग्यं विवेकित्याज्यं परस्पराश्रयं परस्पराभिभाव्याभिभावकभावञ्च गच्छति" इत्येवं स्थिते सति कारणान्तरे रजस्तमसी अभिभूय सत्त्वं यदा प्रवर्द्धते तदा सत्त्वोद्रेकात् सुखं जायते । सत्त्वतमसी अभिभूय सति कारणान्तरे यदा रजः प्रवर्द्धते तदा रज उद्रेकात् दुःखं भवति सत्त्वरजसी अभिभूय यदा तम उद्रिक्तं भवति तदा मोह विषादादिकं जायते इति सुखादिसमुद्भवप्रकारः । तत्र कारणं धर्म्माधर्म्मादिसचिवोरागादिरेव । यथाह "सुखानुशयी रागः" दुःखानुशयी, द्वेषः" पा०सू०/